कक्षा- 12वी विषय- ज्योतिषम् विषयकोड - 1224

VIJAYSHRI
PAGE NO.:
DATE:

## वस्तुनिष्ठ-प्रश्नाः (अंक-1)

(1) "राश्योर्ययोः कृतियुतिः" इत्यत्र कृतिःशब्दस्यार्थः वर्गः भवति इति सत्यम् असत्यं वा ?

(2) रवियुतम् अत्र रविशब्देन का संख्या ग्राह्या ?

(क) 12 (ख) 11
(ग) 15 (घ) 20

(3) "त्रयोविंशतिक्षुण्णः" अत्र क्षुण्णः इति शब्दस्य अर्थः गुणितः भवति न वा ?

(4) वेदाङ्गेषु नेत्ररूपात्मकं शास्त्रं किम् ?

(क) शिक्षा (ख) ज्योतिषम्
(ग) व्याकरणम् (घ) छन्दः

(5) ज्योतिषशास्त्रस्य कति प्रवर्तकाः सन्ति ?

(क) 10 (ख) 20
(ग) 16 (घ) 18

(6) ज्योतिषशास्त्रस्य त्रिस्कन्धेषु न भवति ।

(क) सिद्धान्तः (ख) होरा
(ग) धर्मशास्त्रम् (घ) संहिता

(7) सूर्यसिद्धान्तः होरास्कन्धस्य ग्रन्थोऽस्ति न वा ?

(8) कस्य स्कन्धस्य भेदः ताजिकं भवति ?

VIJAYSHRI
PAGE NO.:
DATE:

(क) होरायाः (ख) सिद्धान्तस्य
(ग) संहितायाः (घ) पाटीगणितस्य

(9) ज्योतिषशास्त्रं कालज्ञापकं शास्त्रम् अस्ति इति सत्यम् असत्यं वा ?

(10) द्विविधं गणितं कस्मिन् स्कन्धे भवति ?
(क) होरायाम् (ख) संहितायाम्
(ग) सिद्धान्ते (घ) इतिहासे

(11) द्वादशराशयः भवन्तीति सत्यम् असत्यं वा ?

(12) नक्षत्राणि कति सन्ति ?
(क) 9 (ख) 12
(ग) 27 (घ) 35

(13) आचार्यवराहमिहिरस्य पितुर्नाम ________ आसीत्।

(14) ब्रह्मगुप्तस्य ग्रन्थोऽस्ति ।
(क) सिद्धान्तशिरोमणिः (ख) पञ्चसिद्धान्तिका
(ग) सिद्धान्ततत्त्वविवेकः (घ) ब्रह्मस्फुटसिद्धान्तः

(15) "बृहज्जातकं" वराहमिहिरस्य रचना अस्ति इति सत्यम् असत्यं वा ?

(16) मुहूर्तचिन्तामणेः कर्ता अस्ति ।
(क) वराहमिहिरः (ख) वैद्यनाथः
(ग) रामाचार्यः (घ) भास्कराचार्यः

(17) अस्य आचार्यस्य ग्रन्थाः त्रिषु स्कन्धेषु समुपलभ्यन्ते ।

(क) भास्कराचार्यस्य (ख) वराहमिहिरस्य
(ग) कमलाकरभट्टस्य (घ) कल्याणवर्मणः

(18) आचार्य ब्रह्मगुप्तः 520 मितशकाब्दे जातः इति सत्यम् असत्यं वा ?

(19) 1330 मितशकाब्दे कः जात ?

(क) मकरन्दः (ख) वराहमिहिरः
(ग) वैद्यनाथः (घ) आर्यभटः

(20) जिष्णुसुतः आचार्यः कः ?

(क) आर्यभटः (ख) ब्रह्मगुप्तः
(ग) महर्षिपराशरः (घ) कल्याणवर्मा

(21) मकरन्दः काशीनिवासी आसीत् इति सत्यम् असत्यं वा ?

(22) वेंकटेशकेतकरस्य स्थितिकालः 300 मितशकाब्दे आसीत इति सत्यम् असत्यं वा ?

(23) अनन्तदैवज्ञस्य सुतः अस्ति ।

(क) कल्याणवर्मा (ख) वैद्यनाथः
(ग) रामदैवज्ञः (घ) भट्टोत्पलः

(24) अयम् आचार्यः महाराष्ट्रब्राह्मणः आसीत ।

(क) वेंकटेश-केतकरः (ख) आर्यभटः
(ग) भोजराजः (घ) कल्याणवर्मा

VIJAYSHRI
PAGE NO.:
DATE:

(25) सिद्धान्त~~ब~~स्कन्धस्य आचार्यः आसीत् ।

(क) वैद्यनाथः (ख) आर्यभटः
(ग) कल्याणवर्मा (घ) जयरामः

(26) रामाचार्यः नीलकण्ठस्यानुजः आसीत् इति सत्यम् असत्यं वा।

(27) वराहमिहिरस्य ग्रन्थोऽस्ति ।

(क) लघुजातकम् (ख) सारावली
(ग) मुहूर्तचिन्तामणिः (घ) फलदीपिका

(28) पञ्चसिद्धान्तिका केन रचिता ?

(क) गणेशदैवज्ञेन (ख) रामदैवज्ञेन
(ग) ~~र~~ वराहमिहिरेण (घ) ब्रह्मगुप्तेन

(29) खण्डखाद्यकं ब्रह्मगुप्तस्य करणग्रन्थः वर्तते इति सत्यम् असत्यं वा ?

(30) मकरन्दसारिण्याः आधारग्रन्थः ________ अस्ति ।

(31) कति पादात्मकम् आर्यभटीयम् ?

(क) 2 (ख) 4
(ग) 3 (घ) 5

(32) वराहमिहिरस्य संहिता ग्रन्थोऽस्ति ।

(क) बृहत्संहिता (ख) वशिष्ठसंहिता
(ग) भद्रबाहुसंहिता (घ) कश्यपसंहिता

(33) ब्रह्मस्फुटसिद्धान्तस्य रचनाकालः ५५० मितशकाब्दः ~~ब~~ वर्तते

इति सत्यम् असत्यं वा ?

(34) योगयात्रा-ग्रन्थः कस्मिन् स्कन्धे आयाति ?

(क) सिद्धान्ते (ख) संहितायाम्
(ग) होरायाम् (घ) आयुर्वेदे

(35) ब्रह्मस्फुटसिद्धान्तः पञ्चसिद्धान्तिकातः परवर्तीग्रन्थः अस्ति न वा ?

(36) वराहमिहिरेण लघुजातकानन्तरं बृहज्जातकं रचितम् इति सत्यम् असत्यं वा ?

(37) पञ्चसिद्धान्तिकायां पैतामहसिद्धान्तः वर्तते न वा ?

(38) लघुजातके भट्टोत्पलटीका अस्ति न वा ?

(39) बृहज्जातके नास्ति ।

(क) ग्रहणसाधनम् (ख) राशिप्रभेदः
(ग) राजयोगः (घ) अष्टकवर्गः

(40) लघुजातके कस्य स्तुतिः वर्तते ?

(क) चन्द्रस्य (ख) विष्णोः
(ग) सूर्यस्य (घ) गुरोः

(41) कालपुरुषस्य हृदये कः राशिः भवति ?

(क) मिथुनः (ख) कर्कः
(ग) सिंहः (घ) कन्या

VIJAYSHRI
PAGE NO.:
DATE:

(42) वृश्चिकराशेः स्वामी कः ?
(क) सूर्यः (ख) मंगलः
(ग) बुधः (घ) गुरुः

(43) अरुणवर्णः कस्य राशेः भवति ?
(क) मेषस्य (ख) वृषस्य
(ग) मिथुनस्य (घ) कर्कस्य

(44) "विषमर्क्षे" अस्य शब्दस्य अर्थः विषमराशौ इति भवति न वा ?

(45) लघुजातके गर्भस्य दशमासाधिपाः वर्णिताः सन्तीति सत्यम् असत्यं वा ?

(46) सौरः ग्रहः कः ?
(क) शुक्रः (ख) शनिः
(ग) मंगलः (घ) बुधः

(47) समराशयः पुरुषराशयः भवन्तीति सत्यम् असत्यं वा ?

(48) अर्कः संज्ञकः ________ ग्रहः भवति ?

(49) दुश्चिक्यभावः भवति ।
(क) प्रथमः (ख) द्वितीयः
(ग) तृतीयः (घ) चतुर्थः

(50) को राशिः कीटसंज्ञकः ?
(क) मेषः (ख) कर्कः

(46)

VIJAYSHRI
PAGE NO.:
DATE:

(ग) कन्या (घ) सिंहः

51) यः राशिः अधिपयुतो दृष्टो वा स्यात स बलवान भवतीति सत्यम असत्यं वा ?

52) चन्द्रस्य उच्चराशिः भवति ?

(क) वृषः (ख) कर्कः
(ग) कन्या (घ) वृश्चिकः

53) ______ राशयः पृष्ठस्थाः बलिनः भवन्ति।

54) त्रित्रिकोणं भवति।

(क) चतुर्थभावः (ख) पञ्चमभावः
(ग) नवमभावः (घ) एकादशभावः

55) अष्टमभावस्य मृत्युसंज्ञा भवतीति सत्यम असत्यं वा ?

56) विषमराशौ प्रथमहोराधिपः कः ?

(क) सूर्यः (ख) चन्द्रः
(ग) मंगलः (घ) बुधः

57) एकद्रेष्काणस्य मानं ______ अंशात्मकं भवति।

58) आत्मकारकः ग्रहः भवति।

(क) सूर्यः (ख) शनिः
(ग) मंगलः (घ) गुरुः

59) ग्रहेषु सेनापतिः ______ भवति।

VIJAYSHRI
PAGE NO.:
DATE:

(60) क्षीणचन्द्रः पापग्रहः शुभग्रहो वा ?

(61) गुरोः नीचराशिः भवति ।

(क) कर्कः (ख) मेषः
(ग) मकरः (घ) तुला

(62) शुक्रस्य पूर्णदृष्टिः कुत्र भवति ?

(क) द्वितीयभावे (ख) चतुर्थभावे
(ग) सप्तमभावे (घ) अष्टमभावे

(63) मंगलस्य शत्रुः कः ?

(क) गुरुः (ख) बुधः
(ग) सूर्यः (घ) शनिः

(64) तमः कस्य ग्रहस्य संज्ञा वर्तते ?

(क) सूर्यस्य (ख) मंगलस्य
(ग) राहोः (घ) चन्द्रस्य

(65) गुरु-चन्द्र-सूर्याः सात्विकाः भवन्तीति सत्यम् असत्यं वा ?

(66) षष्ठभावस्थः चन्द्रः अरिष्टं करोति न वा ?

(67) उदयसंज्ञकः भावः भवति ।

(क) लग्नम् (ख) तृतीयः
(ग) द्वितीयः (घ) चतुर्थः

(68) सुतसंज्ञकः भावः ——— भवति ।

VIJAYSHRI PAGE NO.: DATE:

(69) केन्द्रस्थः बलवान् लग्नेशः अरिष्टकारकः, अरिष्टभंगकारको वा?

(70) लौहं कस्य भवति ?

(क) सूर्यस्य (ख) शनेः

(ग) बुधस्य (घ) गुरोः

(71) द्वादशे स्थितस्य सम्पूर्णायुः विनश्यतीति सत्यम् असत्यं वा ?

(72) पञ्चमभावे स्थितस्य ग्रहस्य वक्रार्धहानिः भवति न वा ?

(73) एकस्मिन् राशौ बलवन्तः चत्वारः ग्रहाः स्युस्तदा प्रव्रज्यायोगः भवति न वा ?

(74) प्रव्रज्याकारकः सूर्यः स्यात्तदा जातकः ______ भवति ।

(75) कर्कलग्ने स्थितस्य चन्द्रस्य फलं किं भवति ?

(क) जातकः धनवान् भवति (ख) जातकः मूर्खः भवति

(ग) जातकः विकलाङ्गः भवति (घ) जातकः धनहीनः भवति

(76) पञ्चग्रहाः उच्चस्थाः स्युस्तदा अवश्यमेव राजयोगः भवतीति सत्यम् असत्यं वा ?

(77) नाभसयोगाः कति भवन्ति ?

(क) 60 (ख) 48

(ग) 32 (घ) 15

(78) संख्यायोगाः कति भवन्ति ?

(क) 12 (ख) 15

VIJAYSHRI PAGE NO.: DATE:

(ग) 7 (घ) 5

(79) स्त्रीणां सौभाग्यविचारः सप्तमभावाद् भवति न वा ?

(80) क्रियसंज्ञकः राशिः कः ?

(क) मेषः (ख) मीनः
(ग) वृषः (घ) कन्या

(81) अष्टमस्थेन गुरुणा देवलोकः प्राप्यते इति सत्यम् असत्यं वा ?

(82) वृत्तस्य परिधिः खण्डः भवति ।

(क) चापः (ख) ज्या
(ग) त्रिज्या (घ) लम्बज्या

(83) व्यासार्धानां तुल्यत्वे वृत्तानां तुल्यत्वं जायते इति सत्यम् असत्यं वा ?

(84) सजातीयचापानां वृत्तखण्डानि सजातीयानि भवन्तिनवा ?

(85) यस्मिन् बिन्दौ रेखयोः स्पर्शो जायते स स्पर्शबिन्दुः भवति इति सत्यम् असत्यं वा ?

(86) ज्यासहितं चापं कथ्यते ।

(क) चापक्षेत्रम् (ख) स्पर्शबिन्दुः
(ग) परिधिः (घ) स्पर्शरेखा

(८७) चापस्य एकप्रान्तादन्य-प्रान्तगा रेखा पूर्णज्या भवति न वा ?

(८८) यस्य क्षेत्रस्य सर्वे भुजा वृत्तं स्पर्शन्ति तत्क्षेत्रं वृत्तोपरिगतं भवति इति सत्यम् असत्यं वा ?

(८९) रेखागणितस्य चतुर्थाध्याये कति प्रतिज्ञाः सन्ति ?

(क) 10 (ख) 20
(ग) 16 (घ) 26

(९०) यस्य सर्वे कोणाः परिधिं स्पृशन्ति तद्वृत्तोपरिगतं भवति न वा ?

(९१) धरातले रेखाद्वितयसंयोगाद् या सूची जायते स भवति।

(क) कोणः (ख) बिन्दुः
(ग) गोलः (घ) परिधिः

(९२) समकोणान् न्यूनः, स न्यूनकोणः भवति इति सत्यम् असत्यं वा?

(९३) बहुभिर्रेखाभिः निर्मितं क्षेत्रं बहुभुजं भवति न वा ?

# अतिलघु-उत्तरीयाः प्रश्नाः (अंक-२)

(94) "एकाव्यक्तं शोधयेदन्यपक्षाद् " अस्य कोऽभिप्रायः ?

(95) अलिकुलदलं यदि 36 भवेत्तर्हि तस्य मूलं किम् ?

(96) "खेन विहृतो राशिः" अस्य कोऽर्थः ?

(97) "सरूपमव्यक्तमरूपकं वा" अस्य कोऽभिप्रायः ?

(98) २० इत्यस्य वर्गं किम् ?

(99) २5 इत्यस्य घनं लिखत।

(100) गणितं कतिविधम् ?

(101) ज्योतिषशास्त्रस्य विकासः कति भागेषु विभक्तः वर्तते ?

(102) वेदाङ्गज्योतिषस्य कर्ता कः ?

(103) ज्योतिषशास्त्रस्य त्रिस्कन्धानां नामानि लिखत।

(104) जन्मकुण्डलीतः फलविचारः ज्योतिषस्य कस्मिन् स्कन्धे भवति ?

(105) ग्रहणनिर्धारणं ज्योतिषस्य केन स्कन्धेन भवति ?

(106) आर्यभटीयस्य पादानां नामानि लिखत।

VIJAYSHRI
PAGE NO.:
DATE:

(107) पञ्चसिद्धान्तिकायां के के सिद्धान्ताः गृहीताः ?

(108) बृहज्जातके कति अध्यायाः सन्ति ?

(109) मकरन्दसारिण्याः प्रयोगः कस्मिन् स्कन्धे भवति ?

(110) मुहूर्तचिन्तामणौ कति अध्यायाः सन्ति ?

(111) वेंकटेश-केतकरेण रचितः ग्रन्थः कः ?

(112) स्वल्पजातकस्य कर्ता कः ?

(113) अनफायोगं वर्णयत ।

(114) गोलयोगः कदा भवति ?

(115) केमद्रुमयोगं विवेचयत ।

(116) किन्नाम क्षेत्रम् ?

(117) यस्य क्षेत्रस्य भुजा अन्तःस्थितक्षेत्रस्य भुजान् स्पर्शन्ति ______ क्षेत्रमुच्यते ।

(118) तदन्तर्गतवृत्तस्य परिभाषा लेख्या ।

(119) त्रिभुजं रचयत ।

(120) तदुपरिगतवृत्तस्य परिभाषां वर्णयत ।

VIJAYSHRI PAGE NO.: DATE:

(121) ~~श्री~~ वर्गद्वितं ~~रवच्छमत~~ रचयत ।

## लघु-उत्तरीयाः प्रश्नाः (अंक-3)

(122) किन्नाम ज्योतिषशास्त्रम् ?

(123) होरास्कन्धस्य परिचयः देयः ।

(124) संहितास्कन्धस्य लक्षणं लिखत ।

(125) वेंकटेश-केतकरस्य स्थितिकालं तस्य रचनाश्च विवेचयत ।

(126) आर्यभटस्य कालः निर्देष्टव्यः ।

(127) वराहमिहिरस्य वैशिष्ट्यं निरूपयत ।

(128) रामदैवज्ञस्य ज्योतिषशास्त्रे योगदानं किम् ?

(129) आयुर्दायः कदा द्विगुणः कार्यः ?

(130) गुरुः कदा अरिष्टभंगकारकः भवति ?

(131) आयुषः अर्धं कदा विनश्यति ?

(132) रज्जु-मुसल-नलयोगान् विवेचयत ।

[signature]

VIJAYSHRI PAGE NO.: DATE:

(133) ब्रह्मवादिनी-योगः प्रतिपादनीयः ।

(134) राजयोगं वर्णयत ।

(135) वृत्तच्छेदनरेखायाः परिभाषा देया ।

(136) को नाम चापान्तः कोणः ?

(137) स्पर्शवृत्तस्य परिचयः देयः ।

## दीर्घ-उत्तरीयाः प्रश्नाः (अंक - 4)

(138) 23य − 24र = 21
25य − 16र = 43 } इति उदाहरणं साधयत ।

(139) चतुस्त्रिगुणयोः राशयोः संयुतिर्द्वियुता तयोः ।
राशिघातेन तुल्या स्यात् तौ राशी वेत्सि चेद्वद ॥
इति स्पष्टयत ।

(140) 70य − 63 = 7य² इति उदाहरणं साधयत ।

(141) वराहमिहिरस्य स्थितिकालं तस्य ग्रन्थान् च प्रतिपादयत ।

VIJAYSHRI PAGE NO.: DATE:

(142) ब्रह्मगुप्तस्य संक्षिप्त-परिचयः देयः ।

(143) आर्यभटस्य प्रमुखसिद्धान्तत्रयं वर्णयत ।

(144) ग्रहमैत्रीविचारं विवेचयत ।

(145) षड्वर्गाणां नामानि विलिख्य होरासाधनस्य एकम् उदाहरणं स्पष्टयत ।

(146) सूर्यस्य स्वरूपं विवेचयत ।

(147) अरिष्टयोगं प्रतिपादयत ।

(148) अरिष्टभंगयोगं विवेचयत ।

(149) दशाक्रमं स्पष्टयत ।

(150) वृत्ते एका जीवा कर्तव्या या निर्दिष्ट-व्यासाल्परेखा तुल्या भवेद् इति उपपादयत ।

(151) चतुर्थोऽध्यायस्य द्वितीया प्रतिज्ञा विवेचनीया ।

(152) वृत्तान्तर्गतमेकं वर्गक्षेत्रं स्पष्टयत ।

VIJAYSHRI PAGE NO.: DATE:

## विश्लेषणात्मक-प्रश्नाः (अंक - 5)

(153) एकस्य रूपत्रिशती षडश्वा अश्वा दशान्यस्य तु तुल्यमूल्याः ।
ऋणं तथा रूपशतञ्च तस्य तौ तुल्यवित्तौ च किमश्वमूल्यम् ॥
इति साधयत ।

(154) एको ब्रवीति मम देहि शतं धनेन त्वत्तो भवामि हि सखे द्विगुणस्ततोऽन्यः ।
ब्रूते दशार्पयसि चेन्मम षड्गुणोऽहं ~~त्वत्तः~~ त्वत्तस्तयोर्वद धने मम किं प्रमाणे ॥ इति स्पष्टयत ।

(155) राशिर्द्वादशनिघ्नो राशिघनाढ्यश्च कः समो यः स्यात् ।
राशिकृतिः षड्गुणिता पञ्चत्रिंशद्युता विद्वन् ॥ इति साधयत ।

(156) अभीष्टवृत्तस्य केन्द्रमन्वेष्टव्यम् ।

(157) परिधौ बिन्दुद्वयगामिनी रेखा वृत्तान्तर्गतैव भवति इति उपपादयत ।

(158) "तुल्यजीवास्तुल्यवृत्तेषु तुल्यचापानुत्पादयन्ति" इति प्रतिज्ञां साधयत ।